IJAMSR

International Conference on Recent Developments in Science, Engineering, Management, and Humanities (ICRDSEMH -2023)
22nd October, 2023, Hyderabad, Telangana, India.

CERTIFICATE NO : ICRDSEMH /2023/C1023831

# ऋक्प्रातिशाख्यवर्णितस्य पिङ्गलच्छन्दःसूत्रवर्णितस्य च गायत्रीछन्दसः तुलनात्मकं समीक्षणम्

# A Comparative Study on Gayatri Metre Between Rikprātiśākhya and Pingalachandahsutra

**Sunanda Bishnu**

Research Scholar, Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India

**संक्षिप्तसार:**साक्षात्कृतधर्मैर्भारतीयमणीषाभिरध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः । ***वेदोऽखिलो धर्ममूलम्*** ।* मन्त्रब्राह्मणात्मकः * सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते । ***इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः*** इति वेदभाष्यकार-सायणाचार्यराद्धान्तः ।* विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः । मानवसंस्कृतेः प्राचीनतमं स्वरूपं विकासश्च वेदस्य परिशीलनेनैव निश्चेतुं शक्यते । समस्तेऽपि जगतीतले भारतस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति । मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते । इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव । एतेषु शिक्षादिषु षड्वेदाङ्गेषु छन्द एव वेदपुरुषस्य पदरूपेण कल्पितम् । तदेव वेदस्य पञ्चमङ्गम◌् आस्ते ।

वैदिकसाहित्ये छन्दःशास्त्रस्योपरि अतीव महत्त्वपूर्णो ग्रन्थ एव आचार्यपिङ्गलविरचितः *पिङ्गलच्छन्दःसूत्रम्* । ऋग्वेदीयप्रातिशाख्येऽपि ग्रन्थस्यास्य अन्तिमे पटलत्रये (षोडशतोऽष्टादशपटलपर्यन्तम्) वैदिकछन्दस आलोचना समुपस्थापिता । द्वयोर्ग्रन्थयोरेतयोः परिवेशित◌ेषु गायत्र्यादिषु सप्तसु वैदिकछन्द◌ःसु गायत्रीछन्दसः तुलनात्मकसमीक्षा एव गवेषणापत्रस्यास्य विषय एवेति ॥

**सूचीमुखशब्दाः : संक्षिप्तसारः, अवतरणिका, ऋक्प्रातिशाख्यस्य परिचयः, पिङ्गलच्छन्दःसूत्रस्य परिचयः, गायत्रीशब्दस्य व्याख्या, ऋक्प्रातिशाख्यस्य गायत्रीच्छन्दः, पिङ्गलच्छन्दःसूत्रस्य गायत्रीच्छन्दः, ऋक्प्रातिशाख्यस्य- पिङ्गलच्छन्दःसूत्रवर्णितस्य गायत्रीछन्दसः तुलनात्मकं समीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी**